106 सुरापो वारुणीमुष्णा पीत्वा पापाद् विमुच्यते ।
तया स काये निर्दग्धे मृत्युना प्रेत्य शुध्यति ।
लोकांश्च लभते विप्रो नान्यथा लभते हि स ।।
शान्ति १५९।४५ ।।

107 सुरापोऽसमतादायी भ्रूणहा गुरुतल्पग ।
तपसा तरते सर्वमेनसश्च प्रमुच्यते ।। अनु १२३।८ ।।

108 सुरापो नियताहारो ब्रह्मचारी क्षमाचर ।
ऊर्ध्वं त्रिभ्योऽथ वर्षेभ्यो यजतेऽग्निष्टुता परम् ।
ऋषभैकसहस्र गा दत्त्वा शुभमवाप्नुयात् ।।
शान्ति १५९।५१ ।।

109 सुरापो ब्रह्महा स्तेयी भ्रूणहा गुरुतल्पग ।
तपसैव सुतप्तेन मुच्यन्ते किल्विषन्तत ।। आश्व ५०।१८ ।।

110 सुवर्णहरण स्तैन्य विप्रासगश्च पातकम् ।
विहरन्मद्यपान चाप्यगम्यागमन तथा ।। शान्ति १५९।३३ ।।

106 पीत for पीत्वा सु (हि) for स कामे for काये तेन ([अ] नेन, चप्र) for प्रेत्य मुच्यते for शुध्यति लोकाश्च (लोकाच्च) for लोकाश्च तादृश्ये for नान्यथा

107 सुराप स्वर्णहारी च for सुरापो दायी

108 निराहारो (निरताहारो, निहृता०) for नियता०. तपश्चर (क्षमापर) for क्षमाचर और्ध्वं for ऊर्ध्वं निष्कृता for ग्निष्टुता पर for परम् ग्राह्या for दत्त्वा शौच for शुभम्

109 प्रसुप्तेन (श्रुतस्तेन) for सुतप्तेन

110 विहारान् (विराम, विहरेन्, विहारो, विहार) for ०हरन् पानाच्च for पान च अगम्यागमन ([अ] प्यगम्य, [अ] प्यगम्मागमने) for ०गमन

111 सूर्येणाभ्युदितो यश्च ब्रह्मचारी भवत्युत ।
तथा सूर्याभिनिर्मुक्त कुनखी श्यावदन्नपि ।।
शान्ति ३५।३ ।।

112 स्तेय कुर्व स्तु गुर्वर्थमापत्सु न निवध्यते ।
बहुश कामकारेण न चेद्य सप्रवर्तते ।। शान्ति ३५।१३ ।।

113 स्तेय तु यस्यापहरेत् तस्मै दद्यात्सम वसु ।
विविधेनाभ्युपायेन तेन मुच्येत किल्विषात् ।।
शान्ति ३६।२३ ।।

114 स्त्रियस्तथापचारिण्यो निष्कृति स्याददूषिका ।
अपि सा पूयते तेन न तु भर्ता प्रदूष्यते ।। शान्ति ३६।३० ।।

115 स्त्रियस्त्वाशकिता पापैर्नोपगम्या हि जानता ।
रजसा सा विशुध्यन्ते भस्मना भाजन यथा ।।
शान्ति ३६।२७ ।।

111 [अ] भ्युदये for अभ्युदितो भावचारी for ब्रह्म० यथा for तथा

112 कुर्याच् (गुर्वश्) for कुर्वन् च (हि) for तु निषिध्यते (निर्बध्यते, निबु०) for निब०

113 धन (स्तेनस्, स्तेन, स्तैन्यात्, स्तैन्य) for स्तेय स्तेयेन for स्तेय तु विदितेन for विविधेन [अ] प्युपायेन for [अ] भ्यु० तदा (तथा, स्तेनो, ततो) for तेन

114 स्त्रिय (स्त्रियास्) for ०यस् [अ] पचारिण्या ([अ] भिचारिण्या) for ०ण्यो स्त्रियश्चपरिचारिण्यो for ०ण्यो स for सा पूज्यते (दूयते, त्यज्यते) for पूयते च for तु

115 विजानता (विजानती) for हि जानता. तथा for यथा

116 स्त्रीशूद्रपतिताश्चापि नाभिभाषेद् व्रतान्वित ।
पापान्यज्ञानत कृत्वा मुच्येदेवव्रतो द्विज ॥ शान्ति ३६।३५ ॥

117 स्वधर्मस्य परित्याग परधर्मस्य च क्रिया ।
अयाज्ययाजन चैव तथाभक्ष्यस्य भक्षणम् ॥
शान्ति ३५।१० ॥

116 स्त्रीशूद्र for स्त्रीशूद्र चैव for चापि विप्रो for व्रतो

117 च क्रिया (चाश्रम, च क्रिय) for च क्रिया चेव (तस्य) for चैव

C VYAVAHĀRA

XXVIII दायभागः ।

1 अनुज हि पितुर्दायो जघाश्रमफलोऽध्वग ।
स्वयमीहितलब्ध तु नाकामो दातुमर्हति ।। अनु १०८।११ ।।

2 अष्टधा तु भवेत्कार्य क्षत्रियस्व युधिष्ठिर ।। अनु ४७।४८ ।।

2a इमे वै बन्धुदायादा षट् पुत्रा धर्मदर्शने ।
षडेवाबन्धुदायादा पुत्रा ·· ·· ··।। आदि ३।२७ ।।
[For the enumeration of the kinds of sons, see xxix 8 and 12]

3 क्षत्रियाया हरेत्पुत्रश्चतुरोऽशान् पितु र्धनात् ।
युद्धावहारिक यच्च पितु स्यात्स हरेच्च तत् ।।
अनु ४७।४९ ।।

1 अनुजस्य for अनुज हि दाय for दायो अनुपघ्नन् पितुर्दाय for अनुज दायो जघाश्रय for ०श्रम ईहेत for ईहित

2 धन for भवेत् सर्व for कार्य क्षत्रियस्य (०याणा, ०य वा) for ०यस्व जनाधिप for युधिष्ठिर क्षत्रियाणा धन पुन for क्ष. र

2 (a) षडेव for इमे वै पुत्रदायादा for बन्धु पुत्रा सद्धर्मदर्शिन (सद्धर्मचारिण, सद्धर्मदर्शिभि, सद्धर्मचारिभि) [पुत्रा षड् धर्मदर्शिभि] for षद् र्शने

3 क्षत्रियाया (०णा) for याया लभेत् (भवेत्) for हरेत् युद्धावचारिक (०भिकारित, ०भिकारिक, ०वतारिक, ०धिकारिक) for युद्धावहारिक Also युद्धोपचारिक यच्च (द्रव्य) for यु क यच्च च for स तत (तु तत, धन) for च तत्

4 क्षत्रियायास्तु य पुत्रो ब्राह्मण सोऽप्यसशय ।
स तु मातृविशेषेण त्रीनशान्हर्तुमर्हति ॥ अनु ४७।१३ ॥

5 जाताना समवर्णासु पुत्राणामविशेषत ।
सर्वेषामेव वर्णाना समभागो धने स्मृत ॥ अनु ४७।५७ ॥

6 ज्येष्टस्य भागो ज्येष्ठ स्यादेकाशो य प्रधानत ।
एष दायविधि पार्थ पूर्वमुक्त स्वयभुवा ॥ अनु ४७।५८ ॥

7 तत्तु दत्त हरेत् पित्रा नादत्त हर्तुमर्हति ।
अवश्य हि धन देय, शूद्रापुत्राय भारत ॥ अनु ४७।१६ ॥

8 त्रय एवाधना राजन्भार्यादासस्तथा सुत ।
यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनम् ॥ आदि ७७।२२ ॥

9 त्रिसाहस्रपरो दाय स्त्रियो देयो धनस्य वै ।
तच्च भर्त्रा धन दत्त नादत्त भोक्तुमर्हति ॥ अनु ४७।२३ ॥

10 ददाति हि स पिण्ड वै पितुर्मातामहस्य च ।
पुत्रदौहित्रयोर्नेह विशेषो धर्मत स्मृत ॥ अनु ४५।१४ ॥

4 क्षत्रियाया for याया ब्राह्मणो न च सशय (ब्राह्मणस्वादनतर for ब्राह्मण य स च (पितृ) for स तु मातु for मातृ

5 वर्णाया (वर्णाना) for वर्णासु प्रजाताना सवर्णाना (प्रजाताय सवर्णाया) for जाताना सु समो for सम धनात् (भवेत for धने

7 त च (स तु, त तु) for तत्तु

9 त्रिसहस्रपरे दाये (त्रिसहस्रावरोदाय, त्रिसाहस्रे परो देय) for त्रि दाय स्त्रियै (स्त्रिया) for स्त्रियो भर्त्रा तच्च (यच्च भर्त्रा, तच्चतुर्धा) for तच्च भर्त्रा भवेत् for धन तच्च तेन भवेद्दत्त (तस्या भर्त्रा भवेद्दत्त) for तच्च दत्त यथाह for नादत्त

10 पौत्र for पुत्र एव (०व) for नेह विशेषो नास्ति धर्मत for विशेषो स्मृत.

11 दशधा प्रविभक्तस्य धनस्यैप भवेत् क्रम ।
सवर्णासु तु जाताना समान्भागान्प्रकल्पयेत् ।। अनु ४७।१६ ।।

12 न तु जात्या मग्मा लोके ब्राह्मण्या क्षत्रिया भवेत् ।
ब्राह्मण्या प्रथम पुत्रो भूयान् स्याद्राजसत्तम ।
भूयोऽपि भूयसा हार्य पितृवित्ताद् युधिष्ठिर ।। अनु ४७।३८ ।।

13 पञ्चधातु भवेत्कार्यं वैश्यस्व भरतर्षभ ।
तयोरपत्ये वक्ष्यामि विभाग च जनाधिप ।। अनु ४७।५३ ।।

14 भूयान् स्यात् क्षत्रियापुत्रो वैश्यापुत्रान्न सशय ।
भूयस्तेनापि हर्तव्य पितृवित्ताद् युधिष्ठिर ।। अनु ४७।४५ ।।

15 भ्रातणामविभक्तानामुत्थानमपि चेत्सह ।
न पुत्रभाग विषम पिता दद्यात्कदाचन ।। अनु १०८।१२ ।।

16 मातुश्च यौतक यत्स्यात्कुमारीभाग एव स ।
दौहित्र एव वा रिक्थमपुत्रस्य पितुर्हरेत् ।। अनु ४५।१३ ।।

11 प्रति (विप्र) for प्रवि वित्तस्य for भक्तस्य स तस्य for धनस्य एव for एष विधि for भवेत् सम for समान् अशान् for भागान्

12 सदृश for प्रथम भूय for भूयान् हि for ऽपि भूय स for भूयसा भाव्य for हार्य भूयो भूयोऽपि सहार्य for भूयो हार्य वित्त for वित्ताद्

13 वैश्यस्य for वैश्यस्व पश्यामि for वक्ष्यामि तयोरपीह पश्यामि for तयो मि

14 भूय for भूयान् भर्तव्य for हर्तव्य

15 न तत्र भाग विहित for न विषम विभजेद्वा (०द्वै) for पिता दद्यात् कदाचन for कथ०

16 यौतुक (पौत्रक, कौतुक, यौवन, यौनक) for यौतक तद् for वा हि तद् (धन) for पितुर्

17 यथैवात्मा तथा पुत्र पुत्रेण दुहिता समा ।
तस्यात्मनि तिष्ठन्त्या कथमन्यो धन हरेत् ।। अनु ४५।१२ ।।

18 यदि वाप्येकपुत्र स्यादपुत्रो यदि वा भवेत् ।
नाधिक दशम दद्याच्छूद्रापुत्राय भारत ।। अन ४७।२१ ।

19 लक्षण्यो गोवृषो यान यत्प्रधानतम भवेत् ।
ब्राह्मण्यास्तद्धरेत्पुत्र एकाश वै पितुर्धनात् ।। अनु ४७।११ ।।

20 वर्णे तृतीये जातस्तु वैश्याया ब्राह्मणादपि ।
द्विरशस्तेन हर्तव्यो ब्राह्मणस्वाद् युधिष्ठिर ।। अनु ४७।१४ ।।

21 वैश्यापुत्रस्तु भागास्त्रीन्शूद्रापुत्रस्तथाष्टमम् ।
सोऽपि दत्त हरेत् पित्रा नादत्त हर्तुमर्हति ।। अनु ४७।५० ।।

22 वैश्यापुत्रेण हर्तव्याश्चत्वारोऽशा पितुर्धनात् ।
पञ्चमस्तु भवेद्भाग शूद्रापुत्राय भारत ।। अनु ४७।५४ ।।

17 तथा for यथा

18 (अ) प्येष स for वाप्येक पुत्रस्य for पुत्र स्याद् अन्यच् for दद्याच् नाधिकाश समादध्याच् (नाधिक तु समादद्याच्) for ना दद्याच्

19 लक्षण्य for ०ण्यो लक्षण्य गो (लक्षणैर्गो) वृषैर्दान (वक्ष्यन्ति गोवृषादान) for ल यत्न तत् for यत् यत्प्रधानमय भवेत् (तत्प्रधान तु सभव) for यत् भवेत् एकाश तु (अर्धेनाश) for एकाश वै

20 अधि for अपि वैश्याया ब्राह्मणस्य तु for वै पि द्वावशौ for द्विरश कर्तव्यो for हर्तव्यो द्विरशौ तेन हर्तव्यौ for द्वि ०यो ब्राह्मणस्त (ब्राह्मणेन, ब्राह्मणस्य) for ब्राह्मणस्वाद्

21 तथाष्टक (तथाष्टम) for ०ष्टमम् वित्त for दत्त कर्तुम् for हर्तुम् इच्छति for अर्हति

22 पुनर् for पितुर् गृहात् for धनात् स्मृतो (हरेद्) for भवेद् पुत्रस्य (पुत्रेण) for पुत्राय

23 शूद्रस्य स्यात्सवर्णैव भार्या नान्या कथचन ॥
शूद्रस्य समभाग स्याद् यदि पुत्रशत भवेत् ॥ अनु ४७।५६ ॥

24 शूद्राया ब्राह्मणाज्जातो नित्यादेयधन स्मृत ।
अल्प वापि प्रदातव्य शूद्रापुत्राय भारत ॥ अनु ४७।५५ ॥

25 शेष तु दशधा कार्य ब्राह्मणस्व युधिष्ठिर ।
तत्र तेनैव हर्तव्याश्चत्वारोंशा पितुर्धनात् ॥ अनु ४७।१२ ॥

6 समवर्णासु जाताना विशेषोऽस्त्यपरो नृप ।
विवाहवैशेष्यकृत पूर्व पूर्वो विशिष्यते ॥ अनु ४७।५९ ॥

27 सर्वे चापि विकर्मस्था भाग नार्हन्ति सोदरा ।
नाप्रदाय कनिष्ठेभ्यो ज्येष्ठ कुर्वीत यौतकम् ॥
अनु १०८।१० ॥

28 सोऽपि दत्त हरेत् पित्रा नादत्त हर्तुमर्हति ।
त्रिभिर्वर्णैस्तथा जात शूद्रो देयधनो भवेत् ॥ अनु ४७।५५ ॥

23 भागा स्युर् for भाग स्याद् समभागाश्च पुत्रा स्युर् (शूद्रस्यापि महाभाग) for शूद्रस्य स्याद्.

24 ब्राह्मणे for ब्राह्मणाज् नित्यदेय (प्रीत्यादेय, नित्य देय) for नित्यादेय च for वा

25 नराधिप for युधिष्ठिर ते च तेनैव कर्तव्याश् for तत्र व्या

26 समवर्णेषु for ०वर्णासु सर्व for सम वैशिष्टय (वैषम्य) for वैशेष्य

27 सर्वदा (सर्वे वा) for सर्वे च भागान् for भाग प्रदाय for (अ) प्रदाय यौतुक (वै तथा, वेतन) for यौतकम्

28 कर्तुम् for हर्तुम्. सदा (तदा) for तथा

29 स्त्रियास्तु यद् भवेद्वित्त पित्रा दत्त युधिष्ठिर ।
ब्राह्मण्यास्तद्धरेत्कन्या यथा पुत्रस्तथा हि सा ।
साहि पुत्रसमा राजन् विहिता कुरुनन्दन ।। अनु ४७।२५ ।।

30 स्त्रीणा तु पतिदायाद्यमुपभोगफल स्मृतम् ।
नापहार स्त्रिय कुर्यु पतिवित्तात्कथचन ।। अनु ४७।२४ ।।

31 स्मृता वर्णाश्च चत्वार पञ्चमो नाधिगम्यते ।
~ हरेत्तु दशम भाग शूद्रापुत्र पितुर्धनात् ।। अनु ४७।१८ ।।

32 हरेज्ज्येष्ठ प्रधानाशमेक तुल्या सुतेष्वपि ।
मध्यमो मध्यम चैव कनीयास्तु कनीयसम् ।। अनु ३७।६० ।।

29 दत्त for वित्त वित्त for दत्त अपुत्रा तद् (अपुत्रस्य) for ब्राह्मण्यास्तद् तस्य for पुत्र

30 दायाद्यात् for ०द्यम् धन for स्मृत कार्य for कुर्यु नापहार स्त्रिया कुर्यात् for ना र्यु पितृ for पति

31 (अ) भि for (अ) धि

32 ज्येष्ठ for ज्येष्ठ प्रधानानाम् for ०नाशम् एव for एक तुल्यसुतेषु (तुल्यासु तेषु) for तु षु एकभार्यासुतेष्वपि for एक पि नैक (चैक, चैक) for चैव कनिष्ठक for कनीयसम्

XXIX पुत्रप्रकाराः ।

1 आत्मज पुत्रमुत्पाद्य यस्त्यजेत्कारणान्तरे ।
न तत्र कारण रेत स क्षेत्रस्वामिनो भवेत् ।। अनु ४९।१५ ।।

2 आत्मा पुत्रस्तु विज्ञेयस्तस्यानन्तरजश्च य ।
नियुक्तजश्च विज्ञेय सुत प्रसृतिजस्तथा ।। अनु ४९।३ ।।

3 एक्रो द्विवर्ण एवाथ तथात्रैवोपलक्षित ।
षडपध्वसजास्ते हि तथैवापसदान् शृणु ।। अनु ४९।८ ।।

4 कश्चिच्च कृतक पुत्र सग्रहादेव लक्ष्यते ।
न तत्र रेत क्षेत्र वा प्रमाण स्याद् युधिष्ठिर ।। अनु ४९।१८ ।।

1 यत् for यस् कारणान्तर for कारणान्तरे कारणात् for कारण स्वक्षेत्र (न क्षेत्र) for स क्षेत्र ह्यसौ for भवेत् स क्षेत्रज उदाहृत for स भवेत्

2 निरुक्तजश्च (नियुक्तजस्तु, निरुक्तजस्तु, नियुक्तश्च स, न युक्तजस्तु, निरुक्तायास्तु) for नियुक्तजश्च प्रसवजस् (प्रसूतजस्, प्रसुतिजस) for प्रसृतिजस्

3 विड्वण for द्विवण एको द्विवणयोर्वाथ for एको थ तथा यत्रो-पलक्षिता for तथै त षड्पध्वसकाश्चापि for षड हि कानी-नापसदान् for तथै न्

4 काचिच्च (कश्चित्तु) for कश्चिच्च सग्रहायेव for ०देव तत्र दैवेन for सग्रहादेव कारण (लक्षण) for प्रमाण वा for स्याद यत्र लक्ष्येत भारत for प्रमाण ०ष्ठिर

5 कानीनश्च सहोढश्च कन्याया यश्च जायते ।
बोढार पितर तस्य प्राहु शास्त्रविदो जना ॥
उद्योग १६८।८ ॥

6 तथा दत्तक्रुतौ पुत्रावध्यूढजश्च तथापर ॥ अनु ४६।४ ॥

7 त्रिषु वर्णेषु ये पुत्रा ब्राह्मणस्य युधिष्ठिर ।
वर्णयोश्च द्वयो स्याता यौ राजन्यस्य भारत ॥
अनु ४९।७ ॥

8 दत्त क्रीत कृत्रिमश्च उपगच्छेत्स्वय च य ।
सहोढो जातरेताश्च हीनयोनिधृतश्च य ॥ आदि १११।२९ ॥

9 मातापितृभ्या सत्यक्त पथि य तु प्रलक्षयेत् ।
न चास्य मातापितरौ ज्ञायेते स हि कृत्रिम ॥ अनु ४६।२० ॥

5 सहोढो य for स च स्वैरिण्या (जारिण्या) for कन्याया

6 अध्योढश् (स्वव्यू, स्वध्यू, सुव्यूहश्, अव्योढश्, आद्योढश्, वध्वोढश्) for अध्यूढश्

7 ते for ये ब्राह्मणेषु for ०णस्य द्वौ for यौ

8 उपक्रीत (तपक्रीत, उपकृत, गर्हितश्च) for कृत्रिमश्च दत्त क्रीतोपविक्रीत (क्रीतोपहितक, हृतक, हितक) for दत्त कृत्रिमश्च ज्ञाति (ज्ञात, जाति) for जात भिन्न for हीन वृत (भृत) for धृत योनिस्तु य सुत for योनि य

9 यस्त्यक्त (सन्यस्त) for सत्यक्त य नु (जात, जतु, यस्त) for य तु कल्पयेत् for लक्षयेत् यमुप for य तुप्र (अ) पि for (अ) स्य नास्य पितरौ ज्ञायेते for न ज्ञायेते ज्ञायेता (ज्ञायते, जायते, जायेते) for ज्ञायेते स हि कृत्रिमक स्मृत for स म

10 रेतजो वा भवेत्पुत्रस्त्यक्तो वा क्षेत्रजो भवेत् ।
अध्यूढ समय भित्त्वेत्येतदेव निबोध मे ।। अनु ४९।१३ ।।

11 षडपध्वसजाश्चापि कानीनापसदास्तथा ।
इत्येते ते समाख्यातास्तान् विजानीहि भारत ।। अनु ४६।५ ।।

12 स्वपत्नीप्रभवान्पञ्च लब्धान् क्रीतान् विवर्धितान् ।
कृतानन्यासु चोत्पन्नात्पुत्रान्वै मनुरब्रवीत् ।। आदि ६९।१८ ।।

13 स्वय जात प्रणीतश्च परिक्रीतश्च य सुत ।
पौनर्भवश्च कानीन स्वैरिण्या यश्च जायते ।।
आदि १११।२८ ।।

10 रेतसो for रेतजो यक्तो (पुत्रो) for त्यक्तो क्षेत्रजो वा भवेत्कथ for त्यक्तो भवेत् अध्योढ (अन्योढ, अगूढ, अव्यूढ) for अध्यूढ एव for एव हित्वेत्येतन्निबोध मे for भि मे

11 षडपध्वसदाश् (षडुपध्वसदाश्) for जाश् इत्येते हि मयाख्यातास् for इत्येते ता विजानीत for विजानीहि पुत्रक for भारत

12. सभवान् for प्रभवान् लब्धान् (लब्ध्वा) for पञ्च कृतान् धर्मान् for लब्धान् क्रीतान् क्रीतान् सव (सुतान् दर्पं) विवर्जितान् (क्रीतान् समयवर्धितान्) for क्रीतान् तान् क्षत्रान् (वृतान्, क्रीतान्) for कृतान् कन्यासु चो (अन्यैरथो, अपि तथो) for ०नन्यासु चो

13 क्षत्रिय (क्षेत्रज, क्षेत्रिक, पुत्रिक) for प्रणीत तत्सम पुत्रिकासुत for परि सुत पौनभवेय for पौ च चारिण्या (भगिन्या, जारिण्या) for स्वैरिण्या य प्र (चैव) for यश्च

XXX. साक्षी ।

1 पृष्टो हि साक्षी य साक्ष्य जानमानोऽन्यथा वदेत् ।
स पूर्वानात्मन सप्त कुले हन्यात्तथा परान् ।। आदि ७।३ ।।

2 यश्च कार्यार्थतत्त्वज्ञो जानमानो न भाषते ।
सोऽपि तेनैव पापेन लिप्यते नात्र सशय ।। आदि ७।४ ।।

3 सामुद्रिक वणिज चोरपूर्व
शलाकधूर्त च चिकित्सक च ।
अरि च मित्र च कुशीलव च
नैतान्साक्ष्येष्वधिकुर्वीत सप्त ।। उद्योग ३५।३७ ।।

1 दुःसाक्ष्य for य साक्ष्य पृष्ट साक्षी तु य साक्ष्ये (क्ष्य) for पृष्टो साक्ष्य जानन्नप्य० जानानश्चा, (जानानोह्ययथा भवेत्) for जान वदेत् पूर्वमात्मनस्तत्र for पूर्वं सप्त कुलान् for सप्त

2 जानतोपि (जानन्नपि, जानानोपि) for जानमानो

3 सामुद्रक for सामुद्रिक वाणिजक (वाणिज) for वणिज चौरपूग (च चौर, चौर्यमुग्र, भोगपूव) for चोरपूत्र शलाकाधूत (शठ धूर्त, श्याल धूर्त वचक) for शलाकधूर्त च साक्ष्ये तु for साक्ष्येषु विप्रकुर्वीत (अधिकुर्वन्ति) for अधिकुर्वीत काले for सप्त

D RĀJA-DHARMA

XXXI. राजधर्मे उपोद्घातः ।

1 अशुर्चीश्च यदा क्रुद्ध क्षिणोति शतशो नरान् ।
सपुत्रपौत्रान्सामात्यास्तदा भवति सोऽन्तक ॥

शान्ति ६८।४४ ॥

2 इन्द्रमेन प्रवृणुते यद्राजानमिति श्रुति ।
यथैवेन्द्रस्तथा राजा सपूज्यो मूतिमिच्छता ॥ शान्ति ६७।४ ॥

3 इन्द्रो राजा यमो राजा धर्मो राजा तथैव च ।
राजा बिभर्त्ति रूपाणि राज्ञा सर्वमिद धृतम् ॥

शान्ति ७३।२६ ॥

4 उदयन् हि यथा सूर्यो नाशयत्यासुर तम ।
राजधर्मास्तथालोक्यामाक्षिपन्त्यशुभा गतिम् ॥ शान्ति ५६।७ ॥

1 यम for यदा पौत्रात् for पौत्रान् भास्कर (सोऽन्तकृत्, भूमिप॰) for सोऽन्तक

2 इन्द्रसेन (॰मेव, ॰मेव) for ॰मेन प्रणमते for प्रवृणुते तद् for यद् पूज्यो वै for सपूज्यो

3 तदा for तथा राज्ञो (राजन्) for राजा भवति for विभर्ति भूतानि for रूपाणि राजापि भक्तिभूतानि for राजा रुपाणि राजा for राज्ञा ध्रुव (तत) for धृतम्

4 भानुर् for सूर्यो त सव हि तदा सूर्यो for उदयन् सूर्यो (अ) शुभ ((अ) श्रुत, (आ) शु तत्, (अ) खिल) for आसुर तप for तम आलोकस्य (आलोकान्, (अ) लौक्याम्) for (अ) लोक्याम् नाशयन्ति (निक्षिपन्ति) for आक्षिपन्ति मर्ति for गति

5 कुरुते पञ्च रूपाणि कालयुक्तानि य सदा ।
भवत्यग्निस्तथादित्यो मृत्युर्वैश्रवणो यम ।। शान्ति ६८।४१ ।।

6 कुर्यात्कृष्णगति. शेष ज्वलितोऽनिलसारथि ।
न तु राज्ञाभिपन्नस्य शेष क्वचन विद्यते ।। शान्ति ६८।८० ।।

7 कोशस्योपार्जनरतिर्यमवैश्रवणोपम ।
वेत्ता च दशवर्गस्य स्थानवृद्धिक्षयात्मन ।। शान्ति ५७।१० ।।

8 त्रिवर्गोऽत्र समासक्तो राजधर्मेषु कौरव ।
मोक्षधर्मश्च विस्पष्ट सकलोऽत्र समाहित ।। शान्ति ५६।४ ।।

9 न हि राज्ञ प्रतीपानि कुर्वन्सुखमवाप्नुयात् ।
पुत्रो भ्राता वयस्यो वा यद्यप्यात्मसमो भवेत् ।।
शान्ति ६८।४९ ।।

5 काम for काल व for य तथादित्या (तथा नित्यो) for तथादित्यो मनुर् for मृत्युर् (अ) न्तक for यम

6 त्वनलो (ज्वलने, ज्वलिते, ज्वलतो, ज्वलनो) for ज्वलितो ज्वलितानिल for ज्वलितोऽनिल राजा for राज्ञा शेष for शेष काचन (किंचन) for क्वचन दृश्यते for विद्यते

7 रत (रतो) for रतिर् दाने (यमे) for यम दशधर्मस्य (गुणदोषस्य, देशवगस्य, दशसर्गस्य) for दशवगस्य स्थाने for स्थान वृद्ध (वृद्धि) for वृद्धि क्षयात्मक (कृषात्मन) for क्षयात्मन

8 (अ) भि for (अ) त्र समाशक्तो (महानस्ति, समायुक्तो, मया सक्तो, समायतो) for समासक्तो त्रिवग कथमप्युक्तो for त्रि क्तो धर्मे हि for धर्मेषु पार्थिव for कौरव धर्मस्य (धर्मेषु) for धर्मश्च सकलेऽत्र समागत for सक त

6 ऽाज्ञा for राज्ञ स्वयम् for सुखम् पूर्वो for पुत्रो

10 न हि जात्ववमन्तव्यो मनुष्य इति भूमिप ।
महती देवता ह्येषा नररूपेण तिष्ठति ।। शान्ति ६८।४० ।।

11 परलोकगुरु चैव राजान योऽवमन्यते ।
न तस्य दत्त न हुत न श्राद्ध फलति क्वचित् ।।
शान्ति ६५।२८ ।।

12 मज्जेत्त्रयी दण्डनीतौ हताया
सर्वे धर्मा न भवेयुर्विरुद्धा ।
सर्वे धर्माश्चाश्रमाणा गता स्यु
क्षात्रे त्यक्ते राजधर्मे पुराणे ।। शान्ति ६३।२८ ।।

13 मानुषाणामधिपति देवभूत सनातनम् ।
देवाश्च बहु मन्यन्ते धर्मकाम नरेश्वरम् ।। शान्ति ६५।२९ ।।

10 न हि राजा त्ववमन्तव्यो for न ०यो मनुष्यैर् for मनुष्य इव for इति

11 सव (सव) for पर भूत for लोक चैव (चाव) for योऽव भक्त for दत्त कृत for हुत श्रुत for श्राद्ध फलते for ०ति

12 सज्जेत् (मुह्येत्) for मज्जेत् राजनीतौ for दण्ड० प्रक्षयेयुर् (प्राथयेयुर्, प्रच्छयेयुर्, प्राद्रवेयुर्) for न भवेयुर् विबुद्धा (विधेया, धरण्या, निरुद्धा) for विरुद्धा वर्णाश् for धर्माश् वाश्रमाण (चाश्रमिणा) for चाश्रमाणा हता for गता नष्टे (धर्मे) for त्यक्ते धर्मेषु दृष्टा (धर्मे प्रविष्टा) for धर्मे पुराणे

13 देवमूर्ति (देवरूप) for ०भूत महाद्युतिम् for सनातनम् (अ) पि नाव (सर्वेभि) for च बहु धर्मकामा सुरेश्वर for धर्म रम्

14 यथा जीवा प्रकृतौ वध्यमाना
धर्माश्रितानामुपपीडनाय ।
एव धर्मा राजधर्मैवियुक्ता
सर्वावस्थ नाद्रियन्ते स्वधर्मम् ।। शान्ति ६३।३० ।।

15 यथा हि रश्मयोऽश्वस्य द्विरदस्याकुशो यथा ।
नरेन्द्रधर्मो लोकस्य तथा प्रग्रहण स्मृतम् ।। शान्ति ५६।५ ।।

16 यदा त्वधार्मिकान्सर्वा स्तीक्ष्णैदैण्डैर्नियच्छति ।
धार्मिकाश्चानुगृह्णाति भवत्यथ यमस्तदा ।। शान्ति ६८।४५ ।।

17 यदा तु धनधाराभिस्तर्पयत्युपकारिण ।
आच्छिनत्ति च रत्नानि विविधान्यपकारिणाम् ।।
शान्ति ६८।४६ ।।

14 जीव (जीवै) for जीवा प्राकृतैर् (प्रकृतैर्, सुकृतैर्, प्राकृता, प्रकृता) for प्रकृतौ वध्यमाना (वाध्यमाना, वाध्यमानो, साध्यमानो) for वध्यमाना धर्माश्रितानाम् (धर्मच्युतानाम्, सर्वाश्रितानाम्, धर्म श्रुतानाम्, धर्मश्रुतीनाम्) for धर्माश्रितानाम् अपनोदनाय (अपि पीडनाय, उपजीवनाय, for उपपीडनाय राजधर्म (०धर्मे) for धर्मैर् नियुक्ता (विमुक्ता, निविष्टा) for वियुक्ता एव धर्मात् राजधर्मे नियुक्ता (एव धर्मा राजधर्मेषु युक्ता) for एव युक्ता सर्वाविश्य (सचिन्वन्तो, सचित्यैतान्, सचिन्त्यते, सचिन्त्यन्ते, सच्छिद्यन्ते) for सर्वावस्थ स्वधर्मे (स्वकर्म, स्वधर्मान्, स्वधर्मात्, स्वधर्म, स्वधर्मा) for स्वधर्मम्

15 रथा for यथा यथा for तथा प्रगृहण (प्रहरण) for प्रग्रहण स्म त for स्मृतम्

16 धार्मिकान् for (अ) धार्मिकान् तीव्रैर् (तीक्ष्ण) for तीक्ष्णैर् गृह्णन्ति for गृह्णाति यमस्तथा for ०स्तदा

17 दाराभिस् (धाराद्यैस्) for धाराभिस् प्रवर्षति for तर्पयन्ति उपकारिणा for ०ण आयच्छति (आयच्छन्ति, आच्छिदन्ति) for आच्छिनत्ति वित्तानि for रत्नानि (उ) पकारिण (उपकारिणा, (अ) पकारिण) for (अ) पकारिणाम्

18 यदा निवर्त्यते पापो दण्डनीत्या महात्मभि ।
तदा धर्मो न चलते सद्भूत शाश्वत पर ।। शान्ति ६५।२७ ।।

19 यदा पश्यति चारेण सर्वभूतानि भूमिप ।
क्षेम च कृत्वा व्रजति तदा भवति भास्कर ।।
शान्ति ६८।४३ ।।

20 यदा ह्यासीदत पापान्दहत्युग्रेण तेजसा ।
मिथ्योपचरितो राजा तदा भवति पावक ।। शान्ति ६८।४२ ।।

20a रञ्जिताश्च प्रजा सर्वास्तेन राजेति शब्द्यते ।।
शान्ति ५९।१२७ ।।

21 राजमूलो महाराज धर्मो लोकस्य लक्ष्यते ।
प्रजा राजभयादेव न खादन्ति परस्परम् ।। शान्ति ६८।८ ।।

22 राज्ञ कोशबल मूल कोशमूल पुनर्बलम् ।
तन्मूल सर्वधर्माणा धर्ममूला पुन प्रजा ।। शान्ति १२८।३५ ।।

18 निवर्तते (निवत्यते, न वत्यते) for निवत्यते पाप (पापे) for पापो महामते (०मति) for महात्मभि तथा for तदा सभूत (सघात, सभूता) for सद्भूत परे (पर, पर, पुरा) for पर

19 भूत्वा for कृत्वा चरति for व्रजति भास्वर for भास्कर

20 सदा for यदा (अ) त्यासीदतः for ह्यासीदत पापा (पाप, पापैर पापो) for पापान् सत्येप for मिथ्योप चरिते (चरतो, चरते, चारितो) for चरितो राज्ञा for राजा

20 (a) शस्यते (पद्यते, कथ्यते) for शब्द्यते

21 महाप्राज्ञ (०प्रज्ञ) for ०राज रक्ष्यते (रक्षते, लक्षते) for लक्ष्यते

22 राज्ञा (राज्ञा) for राज्ञ धर्ममूल for ०मूला सदा (प्रजा) for पुन स्मृता (सदा) for प्रजा

23 राष्ट्रस्यैतत्कृत्यतम राज्ञ एवाधिषेचनम् ।
अनिन्द्रमबल राष्ट्र दस्यवोऽभिभवन्ति च ।। शान्ति ६७।२ ।।

24 श्रिय ददाति कस्मैचित्कस्माच्चिदपकर्षति ।
तदा वैश्रवणो राजँल्लोके भवति भूमिप ।। शान्ति ६८।४७ ।।

25 सर्वे त्यागा राजधर्मेषु दृष्टा
सर्वा दीक्षा राजधर्मेषु चोक्ता ।
सर्वे योगा राजधर्मेषु चोक्ता
सर्वे लोका राजधर्मान्प्रविष्टा ।। शान्ति ६३।२९ ।।

23 राज्यस्य for राष्ट्रस्य यत् for (ए) तत् एवाभिषेचने (चैवाभिषेचन) for (अ) भिषेचनम् अनिद्रम् for अनिन्द्रम् अनियम्यबल राष्ट्र for अनि राष्ट्र

24 श्रियो दशति for श्रिय ददाति कस्मिंश्चित् for कस्मै० कस्माच्चापि (कस्माच्चेद्, कस्मादपि) for कस्माच्चिद् अपि कषति for अप० ततो for तदा राजा for राजन्

25 सर्व for सर्वे यागा for त्यागा चोक्ता (दिष्टा, नष्टा, दृष्ट) for दृष्टा सर्वे त्यागा राजधर्मे प्रविष्टा for सर्वा क्ता विद्या for दीक्षा दृष्टा for चोक्ता सर्वा विद्या (सर्वे धर्मा, सर्वे यागा) for सर्वे योगा धर्मेषु युक्ता (धर्मे प्रयुक्ता) for धर्मेषु चोक्ता. धर्मा for लोका राजधम (०धर्मे) for ०धर्मान् प्रतिष्ठा for प्रविष्टा

————

XXXII राज्ञो गुणदोषाः ।

1 अक्रोधनोऽथाव्यसनी मृदुदण्डो जितेन्द्रिय ।
राजा भवति भूताना विश्वास्यो हिमवानिव ।।
शान्ति ५७।२६ ।।

2 अगूढविभवा यस्य पौरा राष्ट्रनिवासिन ।
नयापनयवेत्तार स राजा राजसत्तम ।। शान्ति ५७।३४ ।।

3 अथाददान कल्याणमनसूयुर्जितेन्द्रिय ।
वर्धते मतिमान्राजा स्रोतोभिरिव सागरा ।। शान्ति ९३।११ ।।

4 अदाता ह्यनतिस्नेहो दण्डेनावर्तयन्प्रजा ।
साहसप्रकृती राजा क्षिप्रमेव विनश्यति ।। शान्ति ९३।१५ ।।

5 अधर्मदर्शी यो राजा बलादेव प्रवर्तते ।
क्षिप्रमेवापयातोऽस्मादुभौ प्रथममध्यमौ ।। शान्ति ९३।८ ।।

6 अधर्म्यो हि मृदू राजा क्षमावानिव कुञ्जर ।।
शान्ति ५६।२७ ।।

1. प्रधष्यश्च for ऽथाव्यसनी भगवानिव for हिम०
2. -विषया यस्य for विभवा यस्य पुर (नरा, पुरा) for पौरा विवासिन for निवासिन वेत्ता च (वेत्ता य) for वेत्तार
3. अप्याददान for अथा०
4. आदाता for अदा० साहसी for साहस० प्रणश्यति for विन०
5. अधमशीलो for ०दर्शी उपजातो for ऽपजातो
6. अधर्मो (०मो, ०र्मेहि, अधर्म्येति, सुदम्यो हि) for अधर्म्यो हि नरो for मृदू

7 अनीर्षुर्गुप्तदार स्याच्चोक्ष स्यादघृणी नृप ।
स्त्रिय सेवेत नात्यर्थं मृष्ट भुञ्जीत नाहितम् ॥
शान्ति ७१।८ ॥

8 अपशास्त्रपरो राजा सचयान्नाधिगच्छति ।
अस्थाने चास्य तद्भिन्न सर्वमेव विनश्यति ॥ शान्ति ७२।१४ ॥

9 अप्रमत्तो भवेद्राजा च्छिद्रदर्शी परात्मनो ।
नास्य च्छिद्र पर पश्येच्छिद्रेषु परमन्वियात् ॥
शान्ति ९२।५१ ॥

10 अमोघक्रोधहर्षस्य स्वय कृत्यान्ववेक्षिण ।
आत्मप्रत्ययकोशस्य वसुधेय वसुन्धरा ॥ उद्योग ३८।२३ ॥

11 अरक्षितार हर्तार विलोप्तारमदायकम् ।
त स्म राजकलि हन्यु प्रजा सभूय निर्घृणम् ॥
अनु ६०।१९ ॥

7 नोग्र for चोक्ष मिष्ट for मृष्ट वाहित for नाहितम्

8 अथ (अप्य, अथ) for अप शास्त्रधनो (०धरो) for ०परो. सवधान् (सचय, सशयान्, धर्मार्थान्, सशय) for सचयान् यो (च) for न

9 छिन्नदशी for छिद्र० नान्य (नात्म) for नास्य परे (पर) for पर विद्यु for पश्येच् छिद्रेतु for छिद्रेषु

10 अपेत० (अबद्य) for अमोघ० वसुदैव (स्वाधीनेय) for वसुधेय

11 भर्तार (भोक्तार, कर्तार) for हर्तार अनायकम् for अदायकम् त वै (न स्म, तस्मै, तत्स्म) for त स्म राजन् for राज वर for कलि सनह्य (सहत्य, सदह्य) for सभूय निर्घृणा for निर्घृणम

12 अथसिद्धे पर धम मन्यते यो महोपति ।
ऋता च कुरुते बुद्धि स धर्मेण विरोचते ।। शान्ति ६३।७ ।।

13 अर्थानामननुष्ठाता कामचारी विकत्थन ।
अपि सर्वा मही लब्ध्वा क्षिप्रमेव विनश्यति ।।
शान्ति ९३।१० ।।

14 असत्पापिष्ठसचिवो वध्यो लोकस्य धर्महा ।
सहैव परिवारेण क्षिप्रमेवावसीदति ।। शान्ति ९३।९ ।।

15 आरब्धान्येव कार्याणि न पर्यवसितानि च ।
यस्य राज्ञ प्रदृश्यन्ते स राजा राजसत्तम ।। शान्ति ५७।३२ ।।

16 उत्थानहीनो राजा हि बुद्धिमानपि नित्यश ।
धर्षणीयो रिपूणा॰स्याद्भुजङ्ग इव निर्विष ।।
शान्ति ५८।१६ ।।

17 नित्य हि व्यसनी लोके परिभूतो भवत्युत ।
उद्वेजयति लोक चाप्यतिद्वेषी महीपति ।। शान्ति ५६।४३ ।।

12 अत सिद्धि for अथसिद्धे सता for पर ऋद्धि (ऋती, वृद्धया, ऋद्धया) for ऋता वृद्धि for बुद्धि स्व for स धर्म।प for धर्मेण महीपति for विरोचते

13 विचक्षण for विकत्थन विप्रम् for क्षिप्रम्

14 प्रसीदति for [अ] व०

15 भू (स्व) for न

16 धीरो for हीनो दर्शनीयो for धर्षणीयो

17 व्यसने for ०नी युद्धे जयति for उद्वेज० योति (ह्यति, प्रति) for (अ) प्यति

18 एतावानात्मविजय पञ्चवर्गविनिग्रह ।
जितेन्द्रियो नरपतिर्बाधितु शक्नुयादरीन् ॥ शान्ति ६६।५ ॥

19 एतैरेव गुणैर्युक्तो राजा शास्त्रविशारद ।
एष्टव्यो धर्मपरम प्रजापालनतत्पर ॥ शान्ति ११८।१६ ॥

20 एव सर्वास्ववस्थासु सान्त्वपूर्व समाचरन् ।
प्रियो भवति भूताना धर्मज्ञो वीतभीर्नृप ॥
शान्ति १०३।२६ ॥

21 एव यो धर्मसरम्भी धर्मार्थपरिचिन्तक ।
अर्थान्समीक्ष्यारभते स ध्रुव महदश्नुते ॥ शान्ति ६३।१४ ॥

22 एव ब्रह्मानधीयान राजा यश्च न रक्षिता ।
न वर्षति च यो मेघ सर्व एते निरर्थका ॥ शान्ति ७९।४२ ॥

23 कामक्रोधौ पुरस्कृत्य योऽर्थ राजानुतिष्ठति ।
न स धर्म नचाप्यर्थं परिगृह्णाति बालिश ॥ शान्ति ७२।७ ॥

18 विज्ञेय for विजय विनिर्जय for ०ग्रह विजेतु (नाधिक) for बाधितु रिपून् for अरीन्

19 युक्तै for यु० राज for राजा

20 सर्वज्ञो (धर्मज्ञे) for ०ज्ञो

21 परीक्ष्य for समीक्ष्य रमते (भजते) for (अ) रभते तद् for स सुख for ध्रुव

22 सर्व एव for सर्व एते

23 काम क्रोध (कामदोषौ, कामद्वेषौ) for काम० तु for [अ] तु च for स न चात्मान for न चाप्यर्थ

24 काले मृदु र्यो भवति काले भवति दारुण ।
स साधयति कृत्यानि शत्रू श्चैवाधितिष्ठति ॥
शान्ति १२८।६६ ॥

25 कृतानि सर्वकार्याणि यस्य वा पार्षदा विदु ।
गूढमन्त्रस्य नृपतेस्तस्य सिद्धिरसशयम् ॥ ३८।१६ ॥

26 कृपणानाथवृद्धाना यदाश्रु व्यपमार्ष्टि वै ।
हृष सजनयन्नृणा स राज्ञो धर्म उच्यते ॥ शान्ति ६२।३४ ॥

27 क्रोधजानि तथोग्राणि कामजानि तथैव च ।
दशोक्तानि कुरुश्रेष्ठ व्यसनान्यत्र चैवह ॥ शान्ति ५९।५९ ।

28 क्षममाण नृप नित्य नीच परिभवेज्जन ।
हस्तियन्त्रा गजस्येव शिर एवारुरुक्षति ॥ शान्ति ५६।३९ ॥

29 क्षिप्रकारी जितक्रोध सुप्रसादो महामना ।
अरोगप्रकृतिर्युक्त क्रियावानविकत्थन ॥ शान्ति ५७।३१ ॥

24 कीर्णे for काले प्र for स शत्रु चैव (स यस्तापि) for शत्रूश्चैव

25 जितानि for कृता० वा (वै, ते) for वा पारिषदा (राज्ञ परे) for वा पार्षदा बुद्धिर् for सिद्धिर् न सशय (अनुत्तमा, असशया) for असशयम्

26 सजनयेन् for ०यन्

28 हि नृपते for नृप नित्य जीव for नीच रुरुक्षित (अनुरक्षति) for [अ] रुरु०

29 सुप्रसवो for ०सादो महाबल for ०मना अरोष (अरोग) for अरोग मुक्त for युक्त

30 गुणवान् शीलवान् दान्तो मृदुर्धर्म्यो जितेन्द्रिय ।
सुदर्श स्थूललक्ष्यश्च न भ्रश्यते तदा श्रिय ।। शान्ति ५६।१६ ।।

31 तथा राज्ञ पर सत्यान्नान्यद्विश्वासकारणम् ।।
शान्ति ५६।१८ ।।

32 तद्दण्डविन्नृप प्राज्ञ शूर शक्नोति रक्षितु ।
न हि शक्यमदण्डेन क्लीवेनाबुद्धिनापि वा ।। शान्ति ६२।४५ ।।

33 तैक्ष्ण्य जिह्मत्वमादान्त्य सत्यमार्जवमेव च ।
मध्यस्य सत्त्वमातिष्ठस्तथा वै सुखमृच्छति ।। शान्ति १२०।५ ।।

34 त्यक्तोपात्त मद्यरत द्यूतस्त्रीमृगयापरम् ।
कार्ये महति यो युञ्ज्याद्धीयते स नृप श्रिय ।।
शान्ति ९४।१७ ।।

35 त्रायते हि यदा सर्व वाचा कायेन कर्मणा ।
पुत्रस्यापि न मृष्येच्च स राज्ञो धम उच्यते ।। शान्ति ६२।३१ ।।

30 सत्यवान् for शील० तदा for सदा श्रिय (श्रय) for श्रिय

31 राज्ञा (राज्ञा) for राज्ञ सत्य for सत्यात् आश्वास for विश्वास कारकम् for कारणम्

32 स for तद् दडवत् (०भृत्) for दण्डवित् सव for शूर

33 नित्यत्वम् (जिह्वत्वम्, मृदुत्वम्) for जिह्म० आदान (आदाय) for आदान्त्य सत्त्वम् for सत्यम् तथैव for तथा वै इच्छति (अछति, अहृति, अचति, अच्छिति) for ऋच्छति

34 त्यक्तोपाद्य (०पाय, ०दात्त, त्यक्तदत, त्यक्तोदत, ०पात) for ०पात्त ०पान (०न) for ०रत युजानो for यो युञ्ज्याद्

35 पुत्रन्यासे for ०स्यापि मृष्याच्च (मृष्येत) for ०च्च

36 दशधर्मगतश्चापि यो धर्म प्रत्यवेक्षते ।
सर्वलोकस्य कौन्तेय राजा भवति सोऽऽश्रमी ।।
शान्ति ६६।२५ ।।

37 दानाच्छेदे स्वयकारी सुद्वार सुखदर्शन ।
आर्तहस्तप्रदो नित्यमाप्तमन्यो नये रत ।। शान्ति ११८।१६ ।।

38 द्विट्छिद्रदर्शी नृपनिर्नित्यमेव प्रशस्यते ।
त्रिवर्गविदितार्थश्च युक्तचारोपधिश्च य ।। शान्ति ५७।१७ ।।

39 धर्ममेवानुवर्तस्व न धर्माद्विद्यते परम् ।
धर्मे स्थिता हि राजानो जयन्ति पृथिवीभिमाम् ।।
शान्ति ६३।६ ।।

40 धर्मारामान् धर्मपरान् येन रक्षन्ति मानवान् ।
पार्थिवा पुरुषव्याघ्र तेषा पाप हरन्ति ते ।। शान्ति ६६।२७ ।।

36 देशधम (दशाधम) for दश० या for यो प्रत्यवेक्षयेत् (प्रत्यवेक्षेत) for ०वेक्षते लोकेषु for लोकस्य

37 दानच्छेदे (नातिच्छत्ता, ०द्य, ०द्य) for दानाच्छेदे श्रद्धालु (सुचार, सुदार, सद्वार, सुस्वादु, सस्वादु, स्वादुर) for सुद्वार आर्द्र for आत आप्ता मात्यो (आप्तमाप्तो) for आप्तमन्यो

38 द्विपेन्द्रदर्शी (छिद्रदर्शी च, विनिद्रदर्शी द्विट् चित्र०, विचित्रदर्शी अच्छिद्र०, अच्छिद्रशील) for द्विट छिद्रदर्शी त्रिवग (त्रिवर्गे, ०र्गो) for त्रिवर्ग चारपथश् for चारोपधि युक्ता (०क्तया) चारोपधश्च for युक्त श्च

40 धर्मावासान (धर्मागमान्, धमरामान्) for धर्मारामान् च for न पार्थिवा foi मामवान् पार्थिव (मानवान्) for पार्थिवा पाद (धर्म) foi पाप

41 धीरस्य स्पष्टदण्डस्य न ह्यात्मा प्रतिहन्यते ।। शान्ति ५६।४७ ।।

42 धीरो मर्षी शुचि शीघ्र काले पुरुषकारवित् ।
शुश्रूषु भूतवान् श्रोता ऊहापोहविशारद ।। शान्ति ११८।१७ ।।

43 धृतिमान् देशकालज्ञ सर्वधर्मविधानवित् ।
क्षत्रिय क्षत्रियश्रेष्ठ पृथिवीमनुशास्ति वै ।।
आरण्यक १५९।३ ।।

44 न यस्य कूटकपट न माया न च मत्सर ।
विषये भूमिपालस्य तस्य धर्म सनातन ।। शान्ति ५७।३७ ।।

45 नराधिपश्चाप्यनुशिष्य मेदिनी
दमेन सत्येन च सौहृदेन ।
महद्भिरिष्ट्वा क्रतुभिर्महायशा
स्त्रिविष्टपे स्थानमुपैति सत्कृतम् ।। शान्ति ६८।६० ।।

41 वीरस्य f r धी० धृत० (स्पृष्ट०, सृष्ट०, सम०) for स्पष्ट तस्याज्ञा (नह्यात्मा) for नह्याज्ञा

42 धीर (वीरो) for धीरो मनीषी for मर्षी तीक्ष्ण (दीर्घ) for शीघ्र काल for काले कालवित् (कारवान्) for ०वित् ज्ञाता for श्रोता व्यूहापोह for ऊहापोह

43 सवधमविभागवित् (सवकर्मविभागवित्) for सवधमविधानवित् प्रशास्ति पृथिवी चिर (पृथिवीमनुशासति) for पृथिवीमनुशास्ति वै,

44 चास्य for यस्य कूटा for कूट कपटा (प्रकट, ०ट, प्रशम) for कपट

45 समेन for दमेन त्रिविष्टपे (त्रिपिष्टपे, ०प) for त्रिवि० सत्कृत (सत्कृति, शाश्वत) for सत्कृतम्

46 न हि सत्यादृते किंचिद्राज्ञा वै सिद्धिकारणम् ।
सत्ये हि राजा निरत प्रेत्य चेह च नन्दति ।। शान्ति ५६।१७ ।।

47 न हि कामात्मना राज्ञा सतत शठबुद्धिना
नृशसेनातिलब्धेन शक्या पालयितु प्रजा ।। शान्ति ७६।१४ ।।

48 नह्युत्थानमृते दैव राज्ञामर्थप्रसिद्धये ।। शान्ति ५६।१४ ।।

49 नान्यानपीडयित्वेह कोश शक्य कुतो बलम् ।
तदथ पीडयित्वा च दोष न प्राप्तुमर्हति ।। शान्ति १२८।३६ ।।

50 नाहवादी न निर्द्वन्द्वो न यत्किंचनकारक ।
कृते कर्मण्यमोघाना कर्ता भृत्यजनप्रिय ।। शान्ति ११८।२० ।।

51 निग्रहेण च पापाना साधूना प्रग्रहेण च ।
यज्ञैर्दानैश्च राजानो भवन्ति शुचयोऽमला ।। शान्ति ९८।३ ।।

46 राज्यम् (राज्ञाम्) for सत्याद् राज्ञो for राज्ञा सत्य for सिद्धि कारक for कारणम् निरत प्रेत्य for राजा निरत, नियत (निहित) for निरत राजा for प्रेत्य नदते (निन्दति) for नन्दति

47 कर्मात्मना (कामार्थिना) for ०त्मना काम for शठ बुद्धेन for लुब्धेन शक्य (शक्य) for ०क्या

48 राजधर्म (राज्ञामथ) for ०मर्थ प्रशातये for प्रसिद्धये

49 मान्यान् (न चान्यान्, नान्याम्) for नान्यान् सपीडयित्वा for अपीड० एष for [इ] ह कोश for कोश शक्य (सत्य) for शक्य अर्हसि for ०ति

50 च for यत् कृत for कृते आमात्याना (अयोगाना) for [अ] मोघाना गृह्य (भक्त) for भृत्य

51 जयति for भवन्ति विमलाशया for शुचयोऽमला

52 नित्य यस्तु सतो रक्षेदसतश्च निर्वर्हयेत् ।
स एव राजा कर्तव्यस्तेन सर्वमिद धृतम् ।। शान्ति ७९।४६ ।।

53 नित्योद्युक्तेन वै राज्ञा भवितव्य युधिष्ठिर ।
प्रशाम्यते च राजा हि नारीवोद्यमवर्जित ।। शान्ति ५७।१ ।।

54 पुत्रा इव पितुर्गेहे विषये यस्य मानवा ।
निर्भया विचरिष्यन्ति स राजा राजसत्तम ।। शान्ति ५७।३३ ।।

55 प्रजा पालयतोऽसभ्यगधर्मेणेह भूपते ।
हार्द भय सभवति स्वर्गश्चास्य विरुध्यते ।। शान्ति ८६।१४ ।।

56 प्राज्ञो न्यायगुणोपेत पररन्ध्रेषु तत्पर ।
सुदर्श सर्ववर्णाना नयापनयवित्तथा ।। शान्ति ५७।३० ।।

57 पिता माता गुरुर्गोप्ता वह्निर्वैश्रवणो यम ।
सप्त राज्ञो गुणानेतान् मनुराह प्रजापति ।।
शान्ति १३७।९९ ।।

52 निवर्हेत् (निवर्त , न वर्ह) for निवर्ह० भृत (स्मृत, वृत्त) for धृतम्

53 न प्रशस्यस्तु for प्रशाम्यते च नारी च (नाडीव, नापिच) for नारीव उद्यत for उद्यम वर्जिता (वर्जित) for वर्जित

54 वासिन for मानवा चरति स्म for ०रिष्यन्ति

55 सवदति for सभ० निरुध्यते (न रुध्यते) for वि०

56 त्याग for न्याय परराष्ट्रेषु for ०रन्ध्रेषु सत्वर (लालस) for तत्पर सर्वभूताना for ०वर्णाना वित्तदा (हेतुना) for वित्तथा

57 शास्ता for गोप्ता विभर for मनर

58 मानुषाणामधिपति देवभूत सनातनम् ।
देवाश्च बहुमन्यन्ते धर्मकाम नरेश्वरम् ।। शान्ति ६५।२६ ।।

59 मूढमैन्द्रियक लुब्धमनार्यचरित शठम् ।
अनतीतोपध हिस्र दुर्बुद्धिमबहुश्रुतम् ।। शान्ति ६४।१६ ।।

60 मृगयाक्षास्तथा पान स्त्रियश्च भरतर्षभ ।
कामजान्याहुराचार्या प्रोक्तानीह स्वयभुवा ।।
शान्ति ५६।६० ।।

61 मृदुरित्यवमन्यन्ते तीक्ष्ण इत्युद्विजन्ति च ।
तीक्ष्णकाले च तीक्ष्ण स्यान्मृदुकाले मृदुभवेत् ।।
शान्ति १३८।६४ ।।

62 मेधावी धारणायुक्तो यथान्यायोपपादक ।
दान्त सदा प्रियभाषी क्षमावाश्च विपर्यये ।।
शान्ति ११८।१८ ।।

63 यदा शारणिकान् राजा पुत्रवत्परिरक्षति ।
भिनत्ति न च मर्यादा स राज्ञो धर्म उच्यते ।।शान्ति ६२।३२।।

58 ०रूप for ०भूत महाद्युति for सनातनम् सर्वेभि for च बहु

59 अनायमजितात्मक for अनार्यचरित शठम् मानातीतोपध अनतीतोपर) for अनतीतो०

60 मृगयाख्यास् (०याक्षस्) for ०याक्षास् त्रयश्च for स्त्रियश्च

61 मृत्युर् for मृदुर् जानति for मन्यन्ते त for च भवेत्तीक्ष्णो for चतीक्ष्ण

62 दारुणा (दारणा, करणा) for धारणा यथायुक्तोप for ०न्यायोप वादक for पादक क्षमायाश्च for ०वाश्च

63 युद्धा for यदा राज्य for राजा न स (च न) for न च

64 यदा प्रदक्षिणैर्यज्ञैर्यजते श्रद्धयान्वित ।
कामद्वेषावनादृत्य स राज्ञो धर्म उच्यते ।। शान्ति ९२।३३ ।।

65 यद्यप्यस्य विपत्ति स्याद्रक्षमाणस्य वै प्रजा ।
सोऽप्यस्य विपुलो धर्म एववृत्ता हि भूमिपा ।।
शान्ति ५८।२३ ।।

66 यश्च राजा महोत्साह क्षत्रो धर्मरतो भवेत् ।।
स तुष्येद्दशभागेन ततस्त्वन्यो दशावरै ।। शान्ति ३०८।१५८ ।।

67 यस्तु रञ्जयते राजा पौरजानपदान् गुणै ।
न तस्य भ्रश्यते राज्य गुणधर्मानुपालनात् ।।
शान्ति १३७।१०३ ।।

68 यस्य चारश्च मन्त्रश्च नित्य चैव कृताकृते ।
न ज्ञायते हि रिपुभि स राजा राज्यमर्हति ।।
शान्ति ५७।३९ ।।

64 यजेत (यजते) for यजते अनाश्रित्य for ०दृत्य

65 विवर्ति for विपत्ति रक्ष्यमाणस्य for रक्ष० द्विजा for प्रजा
हि for ऽपि विमलो for विपुलो

66 स (तु) for च ०धर्मे for ०र्म रता for रतो सातुष्येद्
(सतुष्यद्, स तुष्यद्) for स तुष्येद् दशपरै (०वर, ०पर) for
०वरै

67 य स्म for यस्तु राज्ञा (सदा) for पौर गणै for गुणै तत्र
for तस्य नश्यते (ग्रस्यते, भ्रस्यते, भज्यते, दृश्यते) for भ्रश्यते
स्वय for गुण धर्मार्थे for धर्मानु

68 यश्च for यस्य ०तौ for कृते ज्ञायते (ज्ञायेते) for ०यते

69 यस्य स्म विषये राज्ञ स्तेनो भवति वै द्विज ।
राज्ञ एवापराध त मन्यते तद्विदो जना ॥
शान्ति ७७।१२ ॥

70 य सत्करोति ज्ञानानि नेय पौरहिते रत ।
सता धर्मानुगस्त्यागी स राजा राज्यमर्हति ॥ शान्ति ५७।३८ ॥

71 युक्तदण्डो न निर्दण्डो धर्मकार्यानुशासक ।
चारनेत्र परावेक्षी धर्मार्थकुशल सदा ॥ शान्ति ११८।२२ ॥

72 रक्षितात्मा तु यो राजा रक्ष्यान् यश्चानुरक्षति ।
प्रजाश्च तस्य वर्धन्ते ध्रुव च महदश्नुते ॥ शान्ति ६४।१८ ॥

73 राजा गुणशताकीर्ण एष्टव्यस्तादृशो भवेत् ॥
शान्ति ११८।२३ ॥

69 यस्मात्स (यत्तस्य) for यस्य स्म राजन for राज्ञ स्तेना भवन्ति वै द्विजा for स्तेनो द्विज तु for त तद्विजोत्तमा (तद्विजातय) for तद्विदो जना

70 य सस्करोति (यस्मात्करोति) for य सत्क० ज्ञातीनि (भूतानि, दानानि) for ज्ञा० ज्ञेये (ज्ञेय, श्रेयान्) for नेय परहिते (पौरो०) for पोर० सतो for सता वर्त्यानुगस for धर्मा० स्वर्गम for राज्यम्

71 युक्तदण्डे (युक्त दण्डो, युक्तदम्भो, विनिदण्डो) for युक्तदण्डो धमकामोनु for ०कायानु साधक (शासन शासका, शसक) for शासक चारुनेत्र for चारनेत्र कृतावेक्षी (यथावेक्षी, प्रजावेक्षी, परापेक्षी, परान्वेषी) for परावेक्षी तथा for सदा

72 रक्षितार्था for र त्मा च (नु) for तु (अ) पि [(अ) भि] for अनु रक्षितश्च सुरक्षिभि for रक्ष्यान् ति सुख for ध्रुव

73 राज्ञा for राजा

74 राज्य हि सुमहत्तन्त्र दुर्धार्यमकृतात्मभि ।
न शक्य मृदुना वोढुमाघातस्थानमुत्तमम् ।। शान्ति ५८।२१ ।।

75 वाक्पारुष्य तथोग्रत्व दण्डपारुष्यमेव च ।
आत्मनो निग्रहस्त्यागोऽथार्थदूषणमेव च ।। शान्ति ५९।६१ ।।

76 विवर्धयति मित्राणि तथारीश्चापकर्षति ।
सपूजयति साधूश्च स राज्ञो धर्म उच्यते ।। शान्ति ९१।३५ ।।

77 वृद्धै समन्व्य सद्भिश्च बुद्धिमद्भि श्रुतान्वितै ।
सुस्थित शास्ति दण्डेन व्यसनी परिभूयते ।।
आरण्यक १४९।३८ ।।

78 वेदवेदाङ्गवित्प्राज्ञ सुतपस्वी नृपो भवेत् ।
दानशीलश्च सतत यज्ञशीलश्च भारत ।। शान्ति ६९।३० ।।

79 व्यक्तश्चानुग्रहो यस्य यथार्थश्चापि निग्रह ।
गप्तात्मा गुप्तराष्ट्रश्च स राजा राजधर्मवित् ।।
शान्ति १२०।२९ ।।

74 राज्ञा for राज्य भद्र (कर्तु, तत्र, तन्त्रे) for तत्र अशक्य for न शक्य आयास (आयात, आयास) for आघात एव च (उल्वण) for उत्तमम्

75 दाड for दण्ड विग्रहस् for निग्रहस् निग्रहोथा (निग्रहोर्था) for निग्रह० ह्यर्थ, चाथ (अथ) for ऽथाथ

76 विवर्धयति for ०यति चापि कर्षति for चाप०

77 श्रिया० for श्रुता० धर्मेण for दण्डेन

78 विद्याङ्ग for वेदाङ्ग वसेत् for भवेत्

79 व्यक्ताश् for व्यक्तश् यथान्नश (यथोक्तश्) for यथार्थश् विग्रह for निग्रह ०धर्मश्च for ०राष्ट्रश्च राजसत्तम for ०धर्मवित्

80 शुचिस्तु पृथिवीपालो लोकचित्तग्रहे रत ।
न पतत्यरिभिर्ग्रस्त पतितश्चावतिष्टते ।। शान्ति ५७।२८ ।।

81 सत्य पालयति प्राप्त्या नित्य भूमि प्रयच्छति ।
पूजयत्यतिथीन् भृत्यान् स राज्ञो धर्म उच्यते ।।
शान्ति ९२।३६ ।।

82 सर्वसग्रहणे युक्तो नृपो भवति य सदा ।
उत्थानशीलो मित्राढच स राजा राजसत्तम ।।
शान्ति ११८।२७ ।।

83 सर्वातिशङ्की नृपतिर्यश्च सर्वहरो भवेत् ।
स क्षिप्रमनृजुर्लुब्ध स्वजनेनैव बाध्यते ।। शान्ति ५७।२७ ।।

84 सगृहीतजनोऽस्तब्ध प्रसन्नवदन सदा ।
दाता भृत्यजनावेक्षी न क्रोधी सुमहामना ।।शान्ति ११८।२१।।

80 विशुद्ध० for शुचिस्तु त्वेकवृत्त (लोकवित्त, लोकस्यानु) for लोकचित्त परितश् (पततश्, स्थपतिश्) for पतितश्

81 प्राप्या (प्राप्य, प्रशास्ति, प्रीत्या, गुप्त्या) for प्राप्त्या धर्म for भूमि नियच्छति, (प्रयच्छत, स यच्छति) for प्रय० [अ] तिथि (नित्य) for भृत्यान्

82 सहरणे for सग्रहणे सवदा for य सदा राज for राजा सत्तम for सत्तम

83 स र्वाभिशकी for सवाति० अनृजु for अनृजुर् बध्यते for बा०

84 ऽलब्ध for ऽस्तब्ध तदा for सदा त्राता for दाता सर्व for भृत्य जनापेक्षी for ०वेक्षी अक्रोधी fcr न क्रीधी

85 सविभाज्य यदा भु क्ते न चान्यानवमन्यते ।
निहन्ति बलिन दृप्त स राज्ञो धर्म उच्यते ।।
शान्ति ९२।३० ।।

86 साहसप्रकृतिर्यत्र कुरुते किंचिदुल्वणम् ।
अशास्त्रलक्षणो राजा क्षिप्रमेव विनश्यति ।। शान्ति ९४।४ ।।

87 सुप्रणीतेन दण्डेन प्रियाप्रियसमात्मना ।
प्रजा रक्षति य सम्यग् धर्म एव स केवल ।।
शान्ति १२१।१० ।।

88 स्थानवृद्धिक्षयज्ञस्य षाड्गुण्यविदितात्मन ।
अनवज्ञातशीलस्य स्वाधीना पृथिवी नृप ।। उद्योग ३८।२२ ।।

89 स्वय प्रहर्ता दाता च वश्यात्मा वश्यसाधन ।
काले दाता च भोक्ता च शुद्धाचारस्तथैव च।
शान्ति ५७।२२ ।।

85 यथा for यदा नामात्यान् (नवान्यान्) for न चान्यान् निहन्याद् for निहन्ति तद् for स राज्ञा for राज्ञो

86 साहस (साहस) for सा० यश्च (यस्तु) for यत्र क्रियते (प्रकुते) for कुरुते चरते (रक्षितो) for लक्षणो

87 आत्मन for आदित सत्य for सम्यग् स एव for एव हि

88 अनविज्ञात (अनभिज्ञात, अनभिज्ञान, अनन्तज्ञान, अनवज्ञान) for अनवज्ञात स्वामिन for स्वाधीना स्वधीना तस्य मेदिनी for स्वा . नृप

89 स्याद् for च वश्यदर्शन (रम्यसाधन) for ०साधन दाता for भोक्ता श्रद्धाचारस् for शुद्धा०

XXXIII. राष्ट्रसंग्रहः ।

1 ग्राम ग्रामशताध्यक्षो भोक्तुमर्हति सत्कृत ।
महान्त भरतश्रेष्ठ सुस्फीतजनसकुलम् ।
तत्र ह्यनेकमायत्त राज्ञो भवति भारत ।। शान्ति ८८।७ ।।

2 ग्रामस्याधिपति कार्यो दशग्राम्यस्तथापर ।
द्विगुणाया शतस्यैव सहस्रस्य च कारयेत् ।। शान्ति ८८।३ ।।

3 ग्रामे यान्ग्रामदोषाश्च ग्रामिक परिपालयेत् ।
तान्ब्रूयाद्दशपायासौ स तु विशतिपाय वै ।। शान्ति ८८।४ ।।

1 पार्थिव (यत्कृत) for सत्कृत महार्ते (तदा तद्, तदा तु) for महान्त नगर for भरत सुस्फीत (सुस्थित, सुप्सीत) for सुस्फीत जल for जन राष्ट्रे (राष्ट्र) for राज्ञो

2 दशग्रामस् for ०ग्राम्यम दशग्रामपतिस्तथा for दश र द्विगुणो॰य (च तस्यैव, शतस्यैव) for द्विगुणाया विशत्यादि शत चैव (विशतीश शतेश च, विशस्त्रिशच्छतेश च) for द्विगु व

3 ग्रामीयान् for ग्रामे यान् दोषाश्च for ०षाश्च ग्रामत (ग्रामिक) for ०क प्रति (परि) भावयेत् for परिपालयेत् तद् for तान् देशपाय for दशपाय मन्त्र (स च) for स तु

4 तथा यद्ग्रामकृत्य स्याद्ग्रामिकृत्प च ते स्वयम् ।
धर्मज्ञ सचिव कश्चित्तत्प्रपश्येदतन्द्रित ।। शान्ति ८८।९ ।।

5 नगरे नगरे च स्यादेक सर्वार्थचिन्तक ।
उच्चै स्थाने घोररूपो नक्षत्राणामिव ग्रह ।।
भवेत्स तान्परिक्रामेत्सर्वानेव सदा स्वयम् ।।
शान्ति ८८।१० ।।

6 न्यसेत गुल्मान्दुर्गेषु सधौ च कुरुनन्दन ।
नगरोपवने चैव पुरोद्यानेपु चैव ह ।। शान्ति ६९।६ ।।

7 यानि ग्रामीणभोज्यानि ग्रामिकस्तान्युपाश्नुयात् ।
दशपस्तेन भतव्यस्तेनापि द्विगुणाधिप ।। शान्ति ८८।६ ।।

4 तेषा (येषा) for तथा मग्रामकृत्य for यद्ग्राम० ग्रामकृत्य (ग्राम्यकृत्य, राष्ट्रकृत्य) for ग्रामिकृत्य तेषु यत् (यद्भवेत्) for ते स्वयम् तत्तत्पश्यद् (तदवेक्षेद्, तानवेक्षेद्, प्रत्यपश्येत्) for तत्प्रपश्येद्

5 नागरी for first नगरे नगरे नागरीय स्याद् for नगरे स्याद् सर्वानु (सर्वोनु) for सर्वार्थ चिन्तन for चिन्तक उच्चस्थाने (उच्चै स्थाने, उच्चस्थानो) for उ ने घोररूपे for ०रूपो स च तान् स for भवेत्स त न् परिक्रामन् for परिक्रामेत् सभासद (सभासदान्,) for सदा स्वयम्

6 सत्तम for नन्दन पुरोयानेषु for पु षु सवश for चैवह पुरोद्याने तथैव च for पु ह

7 ग्राम्याणि (ग्रामिक) for ग्रामीण ग्रामिकास् (ग्रामकास्) for ग्रामिकस् तान्युपाश्नियात् (पाश्रयात्, तान्यवाप्नुयात्, ता यु-पाश्नुते) for ०पाश्नुयात् दशमस् for दशपस् भतव्य (वक्तव्यस् तद्वेद्यस्) for भतव्यस्

8 शाखानगरमर्हस्तु सहस्त्रपतिरुत्तमम् ।
धान्यहैरण्यभोगेन भोक्तु राष्ट्रिय उद्यत ।। शान्ति ८८।८।।

9 सोऽपि विशत्यधिपतिवृ त्त जानपदे जने ।
ग्रामाणा शतपालाय सर्वमेव निवेदयेत् ।। शान्ति ८८।५ ।।

8 मुख्यस्तु for मर्हस्तु सहस्त्रपतिम for पतिर् उदगम (उत्तम) for ०मम् धान्य for धान्य हिरण्य for हैरण्य भोग्येन (भागन) for भोगेन भोगे for भोक्तु राष्ट्रियम (राष्ट्रीय) for राष्ट्रिय उद्यत (सज्जित, ०त सगत, सवृत, सहिक) for उद्यत

9 (अ) धिपति for ०पति विशाधिपस्तु तत्सव for सोऽपि तिर वृत्ति (वृत) for वृत्त, जनपदे (दानपते) for जान० एव (एतन, ते तन्) for एव शती चापि सहस्त्रिणे for सव येत्

XXXIV दुर्गाणि पुरं च ।

1 ऊर्जस्विनरनागाश्व चत्वरापणशोभितम् ।
प्रसिद्धव्यवहार च प्रशान्तमकुतोभयम् ।। शान्ति ८७।८ ।।

2 तत्र कोश बल मित्र व्यवहार च वर्धयेत् ।
पुरे जनपदे चैव सर्वदोषान्निवतयेत् ।। शान्ति ८७।११ ।।

3 तस्य द्वाराणि कार्याणि पर्याप्तानि बृहन्ति च ।
सवत सुविभक्तानि यन्त्रैरारक्षितानि च ।।
आश्रम वासिक ६।१७ ।।

4 दुर्गाणा चाभितो राजा मूलच्छेद प्रकारयेत् ।
सर्वेषा क्षुद्रवृक्षाणा चैत्यवृक्षान् विवर्जयेत् ।। शान्ति ६९।३९ ।।

1 ऊजस्व (०स्तीन्, औजस्वि, ऊजस्वी) for ऊजस्वि नागाश्व (नागाश्च, नानाश्वा) for ०श्व

2 यत्र for तत्र कोष (कोष, कोश, शोक) for कोश नित्य for मित्र वर्जयेत् for वर्धयेत् पुरो for पुरे चैव for चैव सवघोष (०दोष) for ०दोषान् निवजयेत् for नि त्

3 सर्वाणि for कार्याणि आयतानि for पर्याप्तानि यत्नैर् (यत्तैर्) for यन्त्रैर् वा रक्षितानि for आ०

4. द्रुमाणा for दुर्गाणा वाभितो (त्वभितो, अभितो) for चाभितो प्रचरयेत् (प्रयोजयेत्) for प्र त् वर्णाना for वृक्षाणा चैत्र for चैत्य वृक्ष for वृक्षान् विसजयेत् for वि त्

5 दुर्गेषु च महाराज षट्सु ये शास्त्रनिश्चिता ।
सर्वेषु तेषु मन्यन्ते नरदुर्गं सुदुस्तरम् ॥ शान्ति ५६।३५ ॥

6 धन्वदुर्गं महीदुर्गं गिरिदुर्गं तथैव च ।
मनुष्यदुर्गमब्दुर्गं वनदुर्गं च तानि षट् ॥ शान्ति ८७।५ ॥

7 नटाश्च नर्तकाश्चैव मल्ला मायाविनस्तथा ।
शोभयेयु पुरवर मोदयेयुश्च सर्वश ॥ शान्ति ६९।५८ ॥

8 परिखाश्चैव कौरव्य प्रतोली सकटानि च ।
न जातु कश्चित्पश्येत्तु गुह्यमेतद्युधिष्ठिर ॥ शान्ति ६९।५३ ॥

5 चैव राजेन्द्र for च ज शास्त्रनिर्मिता (०वित्तमा, निश्चयान्, साप्रत स्थिता, कायनिश्चया) for शास्त्रनिश्चिता सवदुर्गेषु for सर्वेषु तेषु वरदुग for नर० स दुस्तर (सुदुगम) for सु रम्

6 बधदुग (बधुदुर्ग, धन०, धनु०, धान्व०) for धन्वदुर्ग मृद्दुर्ग (सदुर्ग, दुर्ग च) for अब्दुर्ग मनुष्यदुर्गम दुर्ग (दुर्गमपा दुग, ०द्रुमदुर्ग च) for मनुष्य ब्दुर्ग नव (वन) दुर्गाणि तानि षट् for वन षट्

7 नटाश्च (नतकाश्च, नतनाश्च) for नतकाश्च सर्व (सर्वां, मल्लान्), for मल्ला शोषयेयु for शोभयेयु मोचयेयु (सादयेयु) for मोदयेयु

8. परिघाश् (परिघाश्) for परिखाश् राजेन्द्र for कोरव्य निष्कुटानि for सकटानि कस्यचित् for कश्चित् पश्येत for पश्येत्तु न जात्वन्य प्रपश्येत for न त्तु

9 पुर च ते सुगुप्त स्याद्दृढप्राकारतोरणम ।
अट्टाट्टालकसबाध षटपथ सर्वतोदिशम् ।।
आश्रमवासिक ६।१६ ।।

10 प्रकण्ठी कारयेत्सम्यगाकाशजननीस्तथा ।
आपूरयेच्च परिखा स्थाणुनक्रझषाकुला ।। शान्ति ६९।४१ ।।

11 भाडागारायुधागारान्धान्यागाराश्च सर्वश ।
अश्वागारान्गजागारान्बलाधिकरणानि च ।।
शान्ति ६९।५२ ।।

12 यत्पुर दुर्गसपन्न धान्यायुधसमन्वितम् ।
दृढप्राकारपरिख हस्त्यश्वरथसकुलम् ।। शान्ति ८७।६ ।।

9 चैव for चते (ऽ) स्तु for सु गृह (दृढ, वर, द्वार) for दृढ अट्टट्टालक (उच्चाट्टालक, अष्टाट्टालक) for अट्टाट्टालक सबन्ध (सव्याध) for सबाध षट्पद (षट्सुख, सुगुप्त, सत्पथ, षट्गुप्त,) for षट्पथ सर्वतोदिश for ०शम्

10 प्रकण्ठी (पताका, प्रकाडी, प्रगुटी, प्रकाडा, प्रगडी, प्रकडी, परुषी, प्रगडी, प्रकडी, प्रकठी, प्रकीण, प्रकाडी, प्रकुठी प्रकुणी, प्रकठ, प्रखडी) for प्रकण्ठी साम्यम् for सम्यग् प्राकाशम् (आकाश) for आकाश जवनीस् (जननी, अवनीस्, जीवनीस्, अवनि०, जपनीस्, जीवनस्) for जननीस् तदा for तथा आपूरयेश्च (०यच्च) for ०येच्च परिखा (परिघा, परिघा, परिखा) for परिखा स्थानु (स्थान) for स्थाणु कषाकुला (झषाकुला, कुपाकुलान्, ह्यषाकुला) for झ ला

11 योधागाराश् for धान्या०

12 पर (पुनर्) for पुर ससर्ग for सम्पन्नं धान्यायुत (नानायुध) for धान्यायुध दृढप्रधान (०प्रकार) for ०प्राकार परिघ (विषम) for ०ख

13 विद्वास शिल्पिनो यत्र निचयाश्च सुसचिता ।
धार्मिकश्च जनो यत्र दाक्ष्यमुत्तममास्थित ।। शान्ति ८७।७ ।।

14 विशालान् राजमार्गाश्च कारयेत नराधिप ।
प्रपाश्च विपणीश्चैव यथोद्देश समादिशेत् ।। शान्ति ६९।५१ ।।

15 षड्विध दुर्गमास्थाय पुराण्यथ निवेशयेत् ।
सर्वसपत्प्रधान यद्बाहुल्य वापि सभवेत् ।। शान्ति ८७।४ ।।

16 समाजोत्सवसपन्न सदापूजितदैवतम् ।
वश्यामात्यबलो राजा तत्पुर स्वयमावसेत् ।। शान्ति ८७।१० ।।

17 सुप्रभ सानुनाद च सुप्रशस्तनिवेशनम् ।
शूराढ्यजनसपन्न ब्रह्मघोषानुनादितम् ।। शान्ति ८७।९ ।।

13 शिल्पिते for नो हसचिता (सुसचया) for ०चिता जना for जनो धार्मिकाश्च जना यत्र (जनाप्यत्र) for धा यत्र आस्थिता for ०त

14 विपुलाश् for विपणीश् समाविशेत् (समाचरेत्) for ०दिशेत्

15 (अ) भि for (अ) थ सर्वं तस्य (सव सम्यक्) for सर्वसपत् तद् (च) for यद् बाहुभ्या for बाहुल्य (अ) थ ((अ) ति) for (अ) पि यद्भवेत् [(अ) सभवे] for सभवेत्

16 देवत for दैवतम् सदादैवतपूजितम for सदा तम् पश्य for वश्य आविस (से) त् (आविशेत्) for आवसेत्

17 प्रसभ for सुप्रभ शान्तनाद (०श्रान्त, ०शान्ति, भानु०, सानुदान) for ०नाद सुप्रशान्त (०प्रशस्त) for ०स्त निवेदन for ०शनम् शूराढ्य for ०ढ्य गुणसपन्न (जनसपूण) for ०सपन्न शूराढ्य प्राज्ञसपूण for शू न्न नादिन for नादितम्

XXXV दूतः ।

1 अस्तब्धमक्लीवमदीर्घसूत्र सानुक्रोश श्लक्ष्णमहार्यमन्यै ।
अरोगजातीयमुदारवाक्य दूत वदन्त्यष्टगुणोपपन्नम् ।।

उद्योग ३७।२५ ।।

2 कुलीन शीलसपन्नो वाग्मी दक्ष प्रियवद ।
यथोक्तवादी स्मृतिमान्दूत स्यात्सप्तभिर्गुणै ।।

शान्ति ८६।२७ ।।

3 न तु हन्यान्नृपो जातु दूत कस्याचिदापदि ।
दूतस्य हन्ता निरयमाविशेत्सचिवै सह ।। शान्ति ८६।२५ ।।

4 यथोक्तवादिन दूत क्षत्रधर्मरतो नृप ।
यो हन्यात्पितरस्तस्य भ्रूणहत्यामवाप्नुयु ।।

शान्ति ८६।२६ ।।

1 अध्वस्त for अस्तब्धम् शक्त (शुल्क, कुशल, शक्य, शुक्ल) for श्लक्ष्ण अवार्य for अहार्य अरोगि for अरोग वेष (वाच) for वाक्य

2 कुल for शील द्युति for स्मृति

3 हन्या (हर्म्यान्, ह्यन्या) for हन्यान् निरयान् for निरयम्

4 (उ) क्तवचन for ०वादिन क्षात्र for क्षत्र ब्रह्महत्याम् for भ्रूण०

XXXVI उपायाः ।

1 अमित्र मित्रसपन्न मित्रैर्भिन्दन्ति पण्डिता ।
भिन्नैर्मित्रै परित्यक्त दुर्बल कुरुते वशे ॥
आरण्यक ३४।६६ ॥

2 उपायैस्त्रिभिरादानमर्थस्याह बृहस्पति ।
सान्त्वेनानुप्रदानेन भेदेन च नराधिप ।
यमर्थ शक्नुयात्प्राप्तु तेन तुष्येद्धि पण्डित ॥
शान्ति ६९।२३ ॥

3 न बहूनभियुञ्जीत यौगपद्येन शात्रवान् ।
साम्ना दानेन भेदेन दण्डेन च पुरदर ॥ शान्ति १०४।३५ ॥

1 अमित्रेण च सयुक्त for अ न्न वि दति (भेदन्ति) for भि दन्ति त्यक्तान् for त्यक्त युवान (दुर्बलान) for दुबल कुवते for कुरुते वश for वशे

2 उपाये for ०यै आत्मानम for आदानम आर्तस्य for अर्थस्य (अ) पि for (आ) ह शान्त्वेन for सान्त्वेन तु for (अ) नु भेदनेन for भेदेन च नराधिप for ०प यदर्थ (य सर्व) for यमर्थ प्राप्त (प्रास्त) for प्राप्त तुष्टेद्धि (तुष्येत, कृष्येत) for तुष्येद्धि पालित (पाडित) for पडित न तद् युद्धेन पडित for तेन त

3 अपि युञ्जीत [उ (अ) परध्येत उपरुन्धेत] for अभियुञ्जीत पुरदर (०र) for ०र

4 बलस्य व्यसनानीह यान्युक्तानि मनीषिभि ।
मुख्यो भेदो हि तेषा वै पापिष्ठो विदुषा मत ॥

विराट ४६।११ ॥

5 भेद च प्रथम यञ्ज्यात्तूष्णी दण्ड तथैव च ।
काले प्रयोजयेद्राजा तस्मिस्तस्मिस्तदा तदा ॥

शान्ति १०४।२७ ॥

6 यद्येवमभियायाच्च दुर्बल बलवान्नृप ।
सामादिभिरुपायैस्त क्रमेण विनिवर्तयेत् ॥

आश्रमवासिक ११।१७ ॥

7 लब्ध प्रशमयेद्राजा निक्षिपेद्धनिनो नरान् ।
ज्ञात्वा स्वविपय त च सामादिभिरुपक्रमेत् ॥

आश्रमवासिक १२।१७ ॥

4 मुरयभेदे (मुरये भेदे, मुखभगो, मुख्यभेदो, मुखे भेदो) for मुख्यो भेदो
5 भेदे (भिद) for भेद युज्यात् (विन्द्यात्, विद्यात्) for युञ्ज्यात् तूष्णीमपि for तूष्णीदण्ड राजस् for first तस्मिस्
6 यच्च for यदि एनम् for एवम् अभियायास्त्व (०धायाच्च, ०यायाद्वै, ०यायाति, ०यायात्त्वा) for ०यायाच्च यश्च त्वामभियायाति for यद्ये च्च दोबलात् for दुबल नृप for नप दुबल बलवान् नृप (बलवान दुबल नप, दुर्लभ बलवन्नृप) for दुर्बल नृप त्व for त हि for वि वर्तत (वतये, वतय) for वतयेत् क्रमेणैव वि (नि) वतयेत् (०ण च विवर्धयेत्, त क्रमेण निवतयेत्) for क्र येत्
7 बल for लब्ध प्रसादयेद् (प्रवेश, प्रकल्प) for प्रशमयेद् राज्ञा for राजा बलिनो for धनिनो (S) मरान् (नृपान्) for नरान् निक्षेपे धनिनो नरा (निक्षेपधनिनो नरान्) for नि नरान् च (स, स्व, सु, तु) for स्व समय for विषय तच्च (यत्र, तत्र, चापि) for त च ज्ञात्वा सुविषय त्व च (हत्वा तु विषये तत्र) for ज्ञात्वा च उपक्रमै (उपाक्रमेत्, उपक्रमे ०क्रमन्) for ०क्रमेत्

8 विकल्पा बहवो राजन्नापदा पाण्डुनन्दन ।
सामादिभिरुपन्यस्य शमयेत्तान्नृप सदा ॥
आश्रमवासिक १२।११ ॥

9 सनिपातो न गन्तव्य शक्ये सति कथचन ।
मान्त्वभेदप्रदानाना युद्धमुत्तरमुच्यते ॥ शान्ति १०३।२२ ॥

10 साम चोपप्रदान च भेदो दण्डश्च पाण्डव ।
उपेक्षा पञ्चमी चात्र कार्त्स्न्येन समुदाहृता ।।शान्ति ५९।३५॥

11 साम्ना दानेन भेदेन दण्डेनोपेक्षणेन च ।
सावनीयानि कार्याणि समासव्यासयोगत ॥
आरण्यक १४९।४२ ॥

8 बहुवा for बह्वो राज्ञाम् for राजन् नृपाणा (आपद) for आपदा शभादिभिर् for सामा० उपन्यस्तै (उपायैस्तु, ०श्च, उपेतस्य) for उपन्यस्य गणयेत् (गमयेत्) for शमयेत् ता (ता) for तान् शमयेत्ता सदा नृप (समयेस्मान्नराधिप) for शम सदा

9 सनिपाते for ०तो (ऽ) नु for न मन्तव्य for गन्तव्य शात्व for सान्त्व प्रभेदाना (प्रमादाना) for प्रदानाना उत्तमम् (चपरम्, त्ववरम्, त्वपरम्) for उत्तरम्

10 चैव (भेद, भेद) for चोप च दान (प्रदान) for प्रदान ततो (लोभो) for भेदो पाडबा (पार्थिव, पाथिव, भारत) for पाडव समुदाहृत (०पाहृता, ०दाहृता) for ०दाहृता

11 कर्माणि for कार्याणि

——

XXXVII षाड्गुण्यम् ।

1 उत्साहप्रभुशक्तिभ्यां मन्त्रशक्त्या च भारत ।
उपपन्नो नरो यायाद्विपरीतमतोऽन्यथा ।।
आश्रमवासिक १२।६ ।।

2 एतन्मण्डलमित्याहुराचार्या नीतिकोविदा ।
अत्र षाड्गुण्यमायत्तं युधिष्ठिर निबोध तत् ।।
आश्रमवासिक ११।५ ।।

3 गुणवन्तो महोत्साहा धर्मज्ञा साधवश्च ये ।
सदधीत नृपस्तैश्च राष्ट्रं धर्मेण पालयन् ।। शान्ति ६९।१६ ।।

1 मन्त्रि (मित्र) for मन्त्र शक्ति for शक्त्या तमापन्नो for उप०
नृपो for नरो यावद् for यायाद् च वजयेत् for अतोऽन्यथा
(ऽ) नुग for ऽन्यथा

2 मन्त्र for नीति तत्र (यत्र) for अत्र प्राड्मुख्यम् for षाड्गुण्यम्
आयान्तं for आयत्त मे (यत्) for तत्

3 गुणवते (क्षणवन्तो) for गुण० महाबाहो for महोत्साहा स दधीत
for स त नृपैस् for नृपस् तैस्तु (चैव) for तश्च राज्य
for राष्ट्रं पालयेत् for ०यन्

4 तुष्टपुष्टबलो यायाद्राजा वृद्ध्युदये रत ।
आहूतश्चाप्यथो यायादनृतावपि पार्थिव ॥
आश्रमवासिक १२।१३ ॥

5 द्रव्याणा सचयश्चैव कर्तव्य स्यान्महास्तथा ।
यदा समर्थो यानाय न चिरेणैव भारत ॥
आश्रमवासिक ११।८ ॥

6 पर्युपासनकाले तु विपरीत विधीयते ।
आमर्दकाले राजेन्द्र व्यपसर्पस्ततो वर ॥
आश्रमवासिक १२।३ ॥

4 तुष्टिपुष्टि (रुष्टपुष्ट, हृष्ट०, अष्टपुष्ट) for तुष्टपुष्ट बलैर् (जनो) for बलो गच्छेद् (राजा) for यायाद् यायाद् for राजा स्वाभ्युदये for वृद्ध्युदये वत (ऽष्टत, तत, धृत) for रत यायाद् वृद्धयो-दयोद्यत (यायाद् वृद्धयोदये धृत ०त यायाद्वृद्धै-रुपाहृत) for यायाद् रत अकृशश् (अभृतश्) for आहूय चाव्यथो (चाव्ययौ) for चाप्यथो ज्ञायाद् for यायाद् अनृताद (अमृताद्) for अनृताव् पार्थिव (पाण्डव) for ०व विवृतेन हि (०तो हि न) पार्थिव (विवृतो न हि पार्थिव) for अनृ व

5 सञ्चये (सञ्चय, सुचयश्) for सचय तु (सु) for स्यान् तदा for तथा कतव्यस्ते महान् सदा (यत्न काय सदा भवेत्) for कतव्य तथा यथा for यदा दानाय for यानाय समथ चैव जनयन् (येद्) (समर्थश्चैव या (जा) नानाम्) for यदा यानाय स चिरेण (अचिरेण) for नचिरेण अचिरेण च भारत for चि त

6 काले च (कालेन) for काले तु विवर्जयेत् for विधीयते

7 प्रयास्यमानो नृपतिस्त्रिविध परिचिन्तयेत् ।
आत्मनश्चैव शत्रोश्च शक्ति शास्त्रविशारद ॥
आश्रमवासिक १२।५ ॥

8 वाह्यश्चेद्विजिगीषु स्याद्धर्मार्थकुशल शुचि ।
जवेन सन्धि कुर्वीत पूर्वान्पूर्वान् विमोक्षयन् ॥
शान्ति १२९।४ ॥

9 यदा तु हीन नृपतिर्विद्यादात्मानमात्मना ।
अमात्यै सह समन्त्र्य कुर्यात्सन्धि बलीयसा ॥ शान्ति ६९।१४ ॥

10 यदा स्वपक्षो बलवान्परपक्षस्तथाबल ।
विगृह्य शत्रून्कौन्तेय यायात् क्षितिपतिस्तदा ।
यदा स्वपक्षोऽबलवास्तदा सन्धि समाश्रयेत् ॥
आश्रमवासिक ११।७ ॥

11 यात्रा यायादविज्ञातमनाक्रन्दमनन्तरम् ।
व्यासक्त च प्रमत्त च दुर्बल च विचक्षण ॥ शान्ति ६९।१९ ॥

7 प्रदास्यमानो for प्रयास्य० नृपति for नपतिस राजेन्द्र for शत्रोश्च

8 द्विषश्चेद् (वाह्यार्यै) for बाह्यश्चेद् धर्मेषु for धर्मार्थ क्वचित् (शठ) for शुचि जयेन for जवेन कुर्याच्च for कुर्वीत विमोक्षयेत् (विमोचयन्, प्रमोक्षयेत) for विमोक्षयन्

9 आत्मवान् for आत्मना

